**Haimaprabha** (A Trilingual, Non-Predatory, Peer-reviewed, NepJOL indexed Journal)
Vol.- 1 Number 22, 2023 Pp. 57-65 ISSN : 2392-4764 (P)

# न्यायवैशेषिकाभिमताः पञ्चावयवाः

**पुरुषोत्तम आचार्यः** (विद्यावारिध्यनुसन्धानरतः)
उपप्राध्यापकः, न्यायविभागः नेपालसंस्कृतविश्वविद्यालयः, जनताविद्यापीठम्, दाङः, नेपालः
Email: purushottam.acharya@nsu.edu.np
https://doi.org/10.3126/haimaprabha.v1i22.56539

***सारसंक्षेपः***

*प्रस्तुतोऽयमालेखो न्यायवैशेषिकदर्शनयोरवयवविवेचने केन्द्रितो वर्तते । आलेखोऽयं गुणात्मकस्वरूपे सज्जीकृतः । आलेखेऽस्मिन् पुस्तकालयीयविधिद्वारा प्राप्ततथ्यानां विश्लेषणं कृत्वान्ते निष्कर्षः प्रदत्तो वर्तते । अत्र न्यायवैशेषिकाचार्याभिमतस्यावयवस्य स्वरूपं विश्लिष्टं विद्यते । न्यायशास्त्रेऽनुमानस्य भेदद्वयं स्वीक्रियते स्वार्थपरार्थभेदेन । यत्र परार्थानुमानं तत्र नूनमेव प्रतिज्ञादिपञ्चावयववाक्यानामावश्यकत्वं भवति । प्रतिज्ञाहेतूदाहरणोपनयनिगमनानां पञ्चानामेवावयवत्वं प्रतिपाद्य तादृशपञ्चावयववाक्यानां समुदाय एव परमो न्याय इति हि न्यायसिद्धान्तः । अवयवस्वरूपचिन्तनक्रमे सर्वप्रथमं न्यायवैशेषिकैरभिमतमवयवं विविच्य पञ्चानां प्रतिज्ञाद्यवयवानां स्वरूपं क्रमशः प्रस्तुतमत्र । परार्थानुमानेऽवयववाक्यानामावश्यकत्वं नूनमेव भवति । स्वार्थानुमाने चावयववाक्यानामावश्यकत्वाभावेन न्यायाप्रयोज्यानुमानं स्वार्थानुमानं न्यायप्रयोज्यानुमानं परार्थानुमानमिति निष्कर्षोऽत्र प्रस्तुतः । अस्मान्निष्कर्षान्न्यायवैशेषिकसम्बद्धस्यावयवस्वरूपस्यावबोधने जिज्ञासूनां कृतेऽयमालेख उपयोगी भविष्यतीत्यपेक्ष्यते ।*

**शब्दकुञ्जी -** प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम् ।

## विषयपरिचयः

अनुमानस्य भेदद्वयमुररीक्रियते न्यायशास्त्रे । तच्च स्वार्थानुमानं परार्थानुमानञ्चेति । स्वज्ञानं प्रति हेतुभूतं यदनुमानं तत्स्वार्थानुमानमित्युच्यते । अवयववाक्यं हि 'परमो न्याय' इति चोच्यते । न्यायसूत्रकारेण गौतममुनिना प्रथमसूत्रेऽवयवा इमे सप्तमपदार्थरूपतयोपदिष्टा लक्षिताः परीक्षिताश्च । स्वार्थानुमानेन कस्यचन पदार्थस्यानुमानिके ज्ञाने जाते परं प्रति तद्बोधयितुं वाक्यप्रयोगः कर्तव्यो भवति । वाक्यञ्च तत् परार्थानुमानप्रयोग इति चाख्यायते । अत एव न्यायाप्रयोज्यं स्वार्थानुमानं न्यायप्रयोज्यं परार्थानुमानमिति गोवर्धनपण्डितोऽवादीत् । तथा हि- स्वयमेव कश्चन पुरुषो यत्र धूमस्तत्राग्निरिति पाकशालादौ व्याप्तिं गृहीत्वा स एव कदाचित् पर्वतसमीपं गच्छति, तत्र च तस्य पुरुषस्याग्निसन्देहो जायते । तदा पर्वते धूमं पश्यन् व्याप्तिं

स्मरति- यत्र यत्र धूमस्तत्र तत्राग्निरिति । ततः 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं तस्य जायते, तदेव स्वार्थानुमानमित्युच्यते।

स्वयमेव धूमहेतुना वह्निमनुमाय परं प्रति बोधनाय यदवयववाक्यं प्रयुज्यते, तत्परार्थानुमानमित्युच्यते । पञ्चावयववाक्यानि च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानीति । एतेषां प्रतिज्ञादीनां पञ्चानामवयवानां खलु साहाय्येन परस्यापि पुरुषस्यानुमितिदर्शनात् परार्थानुमानेऽवयवानामावश्यकत्वं भवतीति । समग्रतयाऽवयवो नाम किम् ? अवयवानां प्रभेदः कः ? परमो न्यायः कः ? प्रतिज्ञादीनां पञ्चानामवयवानां स्वरूपं कीदृशम् ? इत्यादिसमस्यानां समाधानायैवायमालेखः प्रस्तुतः । न्यायवैशेषिकदर्शनसम्बद्धस्यावयवस्य स्वरूपाध्ययनमेवास्यानुसन्धानात्मकस्यालेखस्य मुख्यं क्षेत्रं सीमा च वर्तते । मूलतो न्यायवैशेषिकदर्शनमस्यानुसन्धानात्मकालेखस्य क्षेत्रं विद्यते चेत् पञ्चानामवयवानां विश्लेषणमेवास्य सीमा वर्तते। इदानीं प्रकृतमनुसृत्य क्रमशः पञ्चानामवयवानां विश्लेषणं विधीयते।

## अध्ययनविधिः

इदमनुसन्धानकाकार्ये मुख्यताय विषयविश्लेषणविधिमवलम्य प्रयुक्तोस्ति । अस्मिनालेखे पुस्तकालयादिकमनुश्रित्य सोद्देश्यनमुनाछनोटनाम्ना विधिना सामग्रीसङ्कलं कृत्य विषयविवेचनं विहितम् । अत्र न्यायदर्शनसम्बद्धेभ्यो वैशेषिकदर्शनसम्बद्धेभ्यश्च सूत्रभाष्यादिग्रन्थेभ्यः, पञ्चावयववाक्यप्रतिपादकग्रन्थान्तरेभ्यश्च सामग्रीः सङ्कलिता विद्यन्ते । सङ्कलिताभ्यस्सामग्रीभ्यः प्राप्ततथ्यानां विश्लेषणं विधाय निष्कर्षः प्रस्तुतो विद्यते।

## सैद्धान्तिकाधारः

आलेखेऽस्मिन् न्यायवैशेषिकदर्शनाभिमतग्रन्थानुसारं प्रतिज्ञाद्यवयवा विश्लिष्टा वर्तन्ते । न्यायवैशेषिकसम्बद्धाः सूत्रभाष्यादिग्रन्थाः, एतद्विषयसम्बद्धा ग्रन्थाश्चात्र सैद्धान्तिकाधारत्वेनाङ्गीकृताः । विशेषतोऽस्मिन् अनुसन्धानात्मकालेखे वैशेषिकसूत्रम्, न्यायसूत्रम्, न्यायभाष्यम्, प्रशस्तपादभाष्यम्, वैशेषिकसूत्रोपस्कारः, तर्कभाषा, तर्कसङ्ग्रहश्चेत्यादिग्रन्थाः सैद्धान्तिकाधारत्वेन परिगणिता विद्यन्ते । एतादृशसैद्धान्तिकाधारेऽवयवस्वरूपं विविच्य सज्जीकृतोऽयमालेखः । अनुसन्धानात्मकालेखेऽस्मिन् प्रविध्यादिविषयं व्यवस्थातुं प्रचलिता लेखकमिति (एपीए)पद्धतिरनुसृता वर्तते।

## विश्लेषणप्रक्रिया

'अवयवस्वरूपम्' इति शीर्षके केन्द्रीभूयायमनुसन्धानात्मकालेखः प्रस्तुतः । प्रथमन्तावदस्यानुसन्धानात्मकालेखस्य कृते न्यायवैशेषिकसम्बद्धग्रन्था निर्धारिताः । अत्र हि

**Haimaprabha** (A Trilingual, Non-Predatory, Peer-reviewed, NepJOL indexed Journal)
Vol.- 1 Number 22, 2023 Pp. 57-65 ISSN : 2392-4764 (P)

सर्वप्रथममनुमानस्य भेदद्वयं प्रदर्श्य परार्थानुमाने प्रयुज्यमानानां पञ्चावयवानां स्वरूपं प्रस्तुतम् । तेषु क्रमशः प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि विश्लिष्यान्ते निष्कर्षः प्रदत्तो वर्तते ।

**अवयवः**

अनुमानप्रमाणस्योपयोगस्तु द्विधा भवति । एकन्तावत् स्वस्य कृतेऽनुमानम्, तच्च स्वार्थानुमानमित्युच्यते । अन्यं प्रत्यनुमितिज्ञानाय तत्र कानिचन वाक्यानि प्रयुज्यन्ते । तच्च परार्थानुमानमित्युच्यते । स्वार्थानुमानेन कस्यचन पदार्थस्यान्यं प्रति तद्बोधयितुं वाक्यप्रयोगः कर्तव्यो भवति । तदेव वाक्यं परार्थानुमानमिति । स्वस्यार्थः प्रयोजनं यस्मात्तत् स्वार्थम् । परस्यार्थः प्रयोजनं यस्मात्तत् परार्थम् । अथवा स्वः-स्वकीयोऽर्थः साध्यसंशयनिवृत्तिरूपः प्रयोजनविशेषो यस्मात्तदिति व्युत्पत्त्या स्वीयसंशयनिवृत्तिजनकमित्यर्थो लभ्यते । एवमेव परः-परकीयोऽर्थः साध्यसंशयनिवृत्तिरूपः प्रयोजनविशेषो यस्मात्तदिति व्युत्पत्त्या परकीयसंशयनिवृत्तिजनकमित्यर्थो ज्ञेयः ।

स्वार्थानुमानं हि स्वयमेव व्याप्तेः पक्षधर्मतायाश्चानुसन्धानेन जायते । परार्थानुमानन्तावत् परपुरुषोक्तन्यायजन्यव्याप्तेः पक्षधर्मतायाश्च ज्ञानेनोत्पद्यमानमिति । यथोक्तं सूत्रोपस्कारे ग्रन्थकर्त्रा "तत्र स्वार्थं स्वयमेव व्याप्तिपक्षधर्मतयोरनुसन्धानात् । परार्थञ्च परोदीरितन्यायजन्यव्याप्तिपक्षधर्मताज्ञानात्" (मिश्रः, सन् १९६९, ४९३) इति । अवयववाक्यसमूहो न्याय इत्यनेन कथनेन प्रतिज्ञादीनां पञ्चानामवयवानां समुदायत्वं न्यायत्वमिति ज्ञायते । यथोक्तं न्यायबोधिनीकारेण- "स्वार्थानुमानं नाम न्यायाप्रयोज्यानुमानमिति । न्यायप्रयोज्यानुमानं परार्थानुमानम् । न्यायत्वञ्च प्रतिज्ञाद्यवयवपञ्चकसमुदायत्वम् । अवयवत्वञ्च प्रतिज्ञाद्यन्यतमत्वम्" (गोवर्धनसुधीः, सन् १९८५, ४४) इति । एतावता परार्थानुमानेऽवयववाक्यानामावश्यकत्वात् स्वार्थानुमाने च नावश्यकत्वात् न्यायप्रयोज्यानुमानं परार्थानुमानं भवति चेन्न्यायाप्रयोज्यानुमानं स्वार्थानुमानमिति फलितोऽर्थः ।

लक्षणन्तु न्यायाप्रयोज्यत्वे सत्यनुमानत्वं स्वार्थानुमानत्वम् । न्यायप्रयोज्यत्वे सत्यनुमानत्वं परार्थानुमानत्वमिति । अवयववाक्यानां संख्याविषये दार्शनिकानां मतभेदो दरीदृश्यते । तत्र केचन अवयवद्वयम्, केचन अवयवत्रयम्, केचन अवयवचतुष्टयमिति स्वीकुर्वन्ति । अतस्संख्याविषये मतैक्यं नावलोक्यते । न्यायदर्शने तु पञ्चावयववाक्यमिति आगौतमादन्नंभट्टावधि निश्चप्रचम् । ते चावयवाः प्रतिज्ञाहेतूदाहरणोपनयनिगमनभेदेन पञ्च सन्ति । यथोक्तं सूत्रकारेण "प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः" (गौतम, १९७८,६४) । भाष्यकारस्त्वेवं वदति यत्- "साधनीयार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चावयवाः प्रतिज्ञादयः समूहमपेक्ष्यावयवा उच्यन्ते" (वात्स्यायनः, सन् १९९८, ९) इति । तत्र पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान्, स सोऽग्निमान् यथा महानसमित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् । एतेषां

खलु पञ्चावयववाक्यानां साहाय्येन परपुरुषस्य यज्ज्ञानं जायते, तत्परार्थानुमानमिति सुवचम् । यथोक्तम्-“यत्तु स्वयं धूमादग्निमनुमाय परप्रत्तिपत्त्यर्थं पञ्चावययववाक्यं प्रयुज्यते, तत्परार्थानुमानम्” (भट्टः, सन् १९८५, १६२) इति ।

तर्कभाषाकारस्तु “अनेन वाक्येन प्रतिज्ञादिमता प्रतिपादितात् पञ्चरूपोपपन्नाल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते । तेनैतत् परार्थानुमानम्” (मिश्रः, सन् २००३, १४७) इति वदति अर्थादेतेन पञ्चावयववाक्येन पञ्चरूपोपपन्नस्सन् हेतुः परं प्रत्यग्निं बोधयितुं समर्थत्वादेवैतदनुमानं परार्थानुमानमिति स्पष्टं ज्ञायते । भाष्यकारस्तु वात्स्यायनः दशावयवमङ्गीकुर्वतां नैयायिकैकदेशिनां मतं स्वभाष्य उपपाद्य तेषु दशावयवेषु जिज्ञासा-संशय-शक्यप्राप्ति-प्रयोजन-संशयव्युदासादीनां पञ्चावयवानां खण्डनं च विधाय प्रतिज्ञादीनां पञ्चानामेवावयवत्वं प्रतिपादयति । किञ्च पञ्चावयववाक्यसमूह एव परमो न्याय इत्यप्यङ्गीकरोति । तद्यथा- “सोऽयं परमो न्यायः” (वात्स्यायनः, सन् १९९८, ९) इति ।

प्रशस्तपादाचार्यस्तु अवयवसामान्यस्य लक्षणमनुक्त्वैव साक्षाद् विभागं कृतवान् । प्रतिज्ञा-अपदेश-निदर्शन-अनुसन्धान-प्रत्याम्नायभेदेन वैशेषिकशास्त्रे प्रशस्तपादाचार्येण पञ्च अवयवाः परिगणिताः । तद्यथा “अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नाया” (देवाचार्यः, सन् २०१६, १८६) इति । वैशेषिकशास्त्रेऽप्यवयवानां पञ्चत्वमेव परन्तु न्यायोक्तावयवेभ्यो भेदस्तु नामत एव न तु वस्तुस्वरूपतः । अत्रैव वैशेषिकसूत्रोपस्कारे ग्रन्थकारः भणति यत् ‘‘एतेषामेव प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नाया इत्यन्वर्था वैशेषिकाणां संज्ञा” (मिश्रः, सन् १९६९, ४९५) इति । एतेन पञ्चावयवानां विषये न्यायवैशेषिकयोः समानैव दृष्टिः प्रतीयते । इदानीं तावन्न्यायसम्मतानां खलु पञ्चानामवयवानां क्रमशो निरूपणं क्रियते-

**प्रतिज्ञा**

साध्यविशिष्टस्य पक्षस्य प्रतिपादकवचनं प्रतिज्ञेति । यथोक्तं पदकृत्यकारेण- “साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा” (चन्द्रजसिंहः, सन् १९८५, १६२) इति । प्रतिज्ञाशब्दस्य सर्वप्रथमं प्रयोगस्तु न्यायसूत्र एव कृतः गौतममुनिना यथोक्तम्- ‘‘साध्यनिर्देशः प्रतिज्ञा” (गौतम, १९७८,६५) अर्थात् साध्यस्य निर्देशः प्रतिज्ञा । यथा - पर्वतो वह्निमान् इत्यत्र साध्यस्य वह्नेः निर्देशः कृतो वर्तते । अथवा पर्वतो वह्निमान् इत्यत्र वह्निविशिष्टपर्वतस्य प्रतिपादकत्वात् पर्वतो वह्निमानिति वाक्यं प्रतिज्ञेति । भाष्यकारस्तु प्रज्ञापनीयधर्मविशिष्टस्य धर्मिणः परिग्रहवचनं प्रतिज्ञेति वदति । यथा- अनित्यः शब्द इति । यथोक्तम्- “प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य परिग्रहवचनं प्रतिज्ञा” (वात्स्यायनः, सन् १९९९, ५५) इति । अर्थात् प्रज्ञापनीयेन साध्येन धर्मेणानित्यत्वेन, विशिष्टस्य धर्मिणः = पक्षस्य शब्दस्य यत् परिग्राहकं वचनं सा प्रतिज्ञा ।

प्रशस्तपादभाष्ये हि प्रतिपाद्यमानसाध्यविशिष्टधर्मिणः कथनम्, प्रत्यक्षादिप्रमाणेनाविरोधवाक्यकथनं प्रतिज्ञेति प्रतिपादितमाचार्यैः । तद्यथा- “तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञा । प्रतिपिपादयिषितधर्मविशिष्टस्य

धर्मिणोऽपदेशविषयमापादयितुमुद्देशमात्रं प्रतिज्ञा । यथा द्रव्यं वायुरिति" (देवाचार्यः, सन् २०१६, १८६) । कश्चिज्जनः प्रमादवशात् प्रत्यक्षादिप्रमाणविरूद्धं साध्यं साधयितुमिच्छेत्, तथा सति विरूद्धवचनमपि प्रतिज्ञाख्यावयवनाम्नोच्येतातः प्रतिज्ञालक्षणे अविरोधीति पदं देयम् । किञ्च "उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं न्यायावयववाक्यम्" (मिश्रः, सन् १९६९, ४९४) इति सूत्रोपस्कारे। पक्षे साध्यस्य ज्ञानं प्रतिज्ञाया प्रयोजनं भवतीत्यपि बोध्यम्।

## हेतुः

पक्षे साध्यस्यास्तित्वसाधनाय साधनत्वेन रूपेण यदवयववाक्यं प्रयुज्यते स हेतुरुच्यते। यथा- पर्वतो वह्निमान् धूमादित्यत्र पर्वतरूपे पक्षे साध्यस्य वह्नेस्साधनाय पञ्चम्यन्तं यत् 'धूमादि'ति वाक्यं प्रयुज्यते, स धूमो हेतुर्भवति। यथोक्तम्- "पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः" (चन्द्रजसिंहः, सन् १९८५, १६२) इति । सूत्रोपस्कारेऽपि ग्रन्थकर्त्रा पञ्चम्यन्तं लिङ्गवचनं हेतुरिति प्रतिपादितं वर्तते । तद्यथा- "हेतुश्च प्रकृतसाधनगतपञ्चम्यन्तो न्यायावयवः" (मिश्रः, सन् १९६९, ४९४) । गौतमस्तूदाहरणस्य साधर्म्येण वैधर्म्येण च साध्यस्य सिद्धिर्येन भवति, सः हेतुरिति वदति। यथोक्तम्- "उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः" (गौतम, १९७८,६६), "तथा वैधर्म्यात्" (गौतम, १९७८,६६) । यथा- अनित्यः, शब्दः, उत्पत्तिधर्मकत्वादित्यत्रोत्पत्तिधर्मकत्वमुदाहरणसाधर्म्यतया हेतुर्भवति । किञ्च- पर्वतो वह्निमान् धूमात् इत्यस्मिन् वाक्ये धूमस्साधर्म्यहेतुः । तथोदाहरणवैधर्म्यादपि साध्यसाधनं हेतुर्भवति। यथा- अनित्यः, शब्दः, उत्पत्तिधर्मकत्वादित्यत्रैव। एवमेव पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् इत्यस्मिन् वाक्ये गन्धवत्त्वं वैधर्म्यहेतुरिति ज्ञेयः।

प्रशस्तपादभाष्ये ग्रन्थकर्त्रा हेतुबोधकवाक्यस्यापदेशत्वं प्रतिपादितम्। अपदेशो नाम हेतुः। साध्यवति वृत्तित्वं साध्याभाववत्यवृत्तित्वं यत्र स हेतुः । उक्तञ्च भाष्ये- "लिङ्गवचनमपदेशः । यदनुमेयेन सहचरितं तत्समानजातीये सर्वत्र सामान्येन प्रसिद्धं तद्विपरीते च सर्वस्मिन् असदेव तल्लिङ्गमुक्तं तस्य वचनमपदेश इति" (देवाचार्यः, सन् २०१६, १८८) । तेन प्रसिद्धविरुद्धसन्दिग्धा-नध्यवसितवचनानामनपदेशत्वमुक्तं भवति। लिङ्गस्य ज्ञानं हेतोः प्रयोजनमिति ज्ञातव्यम्।

## उदाहरणम्

उदाहरणं दृष्टान्तश्चेत्यनर्थान्तरम् । वस्तुतो व्याप्तेः प्रतिपादकं यत् दृष्टान्तवचनं भवति तदुदाहरणमित्युच्यते। यथोक्तम्- "व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम्" (चन्द्रजसिंहः, सन् १९८५, १६२) इति । यथा- महानसम् । पर्वतो वह्निमान् धूमादित्यत्र 'यत्र यत्र धूमस्तत्र तत्र वह्निरि'त्यादौ व्याप्तिप्रतिपादकदृष्टान्तो भवति महानसम् । तादृशदृष्टान्तवचनमेवोदाहरणमिति । अन्यच्च हेतौ साध्यस्य

साध्याभावे च हेत्वाभावस्य यद् व्याप्तिप्रतिपादकदृष्टान्तवचनं भवति, तद् दृष्टान्त इत्युच्यते । हेतौ साध्यनिरूपितव्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणन्तु पूर्वोक्तमेव।

सम्प्रति साध्याभावे हेत्वभावस्य व्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणमुच्यते- यथा 'पर्वतो वह्निमान् धूमादि'त्यत्र 'यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभावः' यथा 'जलह्रदः' इत्यादौ वह्न्यभावे धूमाभावस्य व्याप्तिप्रतिपादकदृष्टान्तवचनरूपमुदाहरणं वर्तते जलह्रद इति । एतयोर्द्वयोर्मध्ये प्रथमे महानसदृष्टान्तेन धूमे वह्नेः व्याप्तिर्जायते चेद् द्वितीये जलह्रददृष्टान्तेन वह्न्यभावे धूमाभावस्य व्याप्तिर्जायते । आचार्यः गौतमस्तु "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्" (गौतम, १९७८,६७), "तद्विपर्ययाद्वा विपरीतम्" (गौतम, १९७८,६८) अर्थात् साध्यस्य समानधर्मतया तद्धर्मभावो यस्मिन् वर्तते, स दृष्टान्तः तद्धर्मभावीति । यथा पर्वतो वह्निमान् धूमात् इत्यस्मिन् वाक्ये पर्वते धूमहेतुना वह्नौ साध्यमाने महानसमुदाहरणम् । तथैव पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् इत्यस्मिन् वाक्ये गन्धवत्त्वहेतुना इतरभिन्नत्वसाध्यमाने हेतुवैधर्म्याज्जलमुदाहरणम्।

प्रशस्तपादभाष्य उदाहरणस्य कृते निदर्शनशब्दस्य प्रयोगः कृतो दृश्यते । यथा न्याये साधर्म्यवैधर्म्याभ्यामुदाहरणं प्रस्तूयते, तद्वद्वैशेषिकेऽपि। यथोक्तम्- "द्विविधं निदर्शनं साधर्म्येण वैधर्म्येण च । तत्रानुमेये सामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम् । अनुमेयविपर्यये च लिङ्गस्याभावादर्शनं वैधर्म्यनिदर्शनमिति" (देवाचार्यः, सन् २०१६, १९७) । एतेन साध्यसाधनयोरनुगमो निर्दिश्यते येन वचनेन तद्वचनं साधर्म्यनिदर्शनमित्यर्थः । यथा- यत् क्रियावत् तद् द्रव्यम्, यथा शरः । साध्यव्यावृत्त्या साधनव्यावृत्तिर्येन वचनेन निर्दिश्यते तद्वचनं वैधर्म्यनिदर्शनमित्यर्थः । यथा- यन्न द्रव्यं तन्न क्रियावत्, यथा गुणः। व्याप्तिज्ञानञ्च तावदुदाहरणस्य प्रयोजनमित्यवगन्तव्यम्।

**उपनयः**

व्याप्तिविशिष्टस्य लिङ्गस्य प्रतिपादकं वचनमुपनय इत्युच्यते। उपसंह्रियते हेतुरनेन (वाक्येन) पक्ष इति उपसंहारः, स एवोपनयः। पर्वतो वह्निमान् धूमात् इत्यस्मिन् वाक्ये पर्वते धूमहेतुना वह्नौ साध्यमाने तथा चायम् (वह्निव्याप्यधूमवाँश्चायं पर्वतः) इत्युपनयः। न्यायसूत्रे गौतमेन "उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः" (गौतम, १९७८,६९) इत्युक्तम् । उपनयस्तावदुदाहरणस्यैवानुसरणं करोति । तद्यथा- उदाहरणेन अन्वयव्याप्तिविशिष्टहेतोर्बोधो जायते चेदुपनयेनाप्यन्वयव्याप्तिविशिष्टहेतोर्ज्ञानं जायते । यदि चोदाहरणेन व्यतिरेकव्याप्तिविशिष्टहेतोर्बोधस्तदोपनयेन तादृशस्यैव हेतोर्बोधो जायेत । तथा चायमिति उपनयस्वरूपं वर्तते। यथा वह्निव्याप्यधूमवान् महानसो भवति तथैवायमपि पर्वतो वह्निव्याप्यधूमवानिति । पदकृत्यकारस्तु "उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः" (चन्द्रजसिंहः, सन् १९८५, १६२) इति वदति।

वैशेषिकदृष्ट्या तूपनयो नामानुसन्धानम् । दृष्टान्ते साध्याविनाभूतेन (व्याप्तेन) दर्शितं लिङ्गं (हेतुः) पक्षेऽनुसन्धीयते प्रतिपाद्यतेऽनेनेति अनुसन्धानम् । भाष्यकारस्तु "अनुमेयधर्ममात्रत्वेनाभिहितं लिङ्गसामान्यमनुपलब्धशक्तिकं निदर्शने साध्यधर्मसामान्येन सह दृष्टमनुमेये येन वचनेनानुसन्धीयते तदनुसन्धानम्" (देवाचार्यः, सन् २०१६, २००) इतिरीत्यानुसन्धानं विवृणोति । पक्षधर्मतावचनार्थं (तथा चायमिति) उपनयस्यावश्यकता भवति । तादृशव्याप्तिविशिष्टहेतुमान् अयमिति ज्ञानं तादृशोपनयवाक्येनैव जायते, एतादृशज्ञानमन्तरा पक्षे साध्यं साधयितुमेव न शक्यते । पक्षधर्मतायाः ज्ञानमेव वस्तुत उपनयस्य प्रयोजनमिति ज्ञातव्यम् ।

## निगमनम्

पक्षे साध्यस्य यदबाधितत्वप्रतिपादकं वचनं भवति, तन्निगमनमित्युच्यते । तस्मात्तथेति निगमनस्वरूपम् । अर्थात् वह्निव्याप्यधूमवत्त्वादयं पर्वतो वह्निमान् इति निगमनम् । पदकृत्यकारेण "पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम्" (चन्द्रजसिंहः, सन् १९८५, १६२) इति निर्दिष्टम् । आचार्यः गौतमस्तु हेतोः कथनेन सह प्रतिज्ञायाः पुनर्वचनं निगमनमिति वदति । यथोक्तम्- "हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्" (गौतम, १९७८,७०) हेत्वपदेशात्- उपनयमाश्रित्य, अर्थात् वह्निव्याप्यधूमवाँश्चायमिति कथनानन्तरं प्रतिज्ञायाः- पर्वतो वह्निमान् इति वाक्यस्य पुनः कथनमेव निगमनम् । निगम्यन्ते प्रतिज्ञाहेतूदाहरणोपनयादयः एकत्रानेनेति निगमनम् । निगम्यन्ते नाम समर्थ्यन्ते, सम्बध्यन्त इति वाऽर्थः । हेतुव्यपदेशात् प्रतिज्ञायाः यत्पुनर्वचनं तद् निगमनमिति ज्ञेयम् । यथा- 'तस्मात्तथा' = तस्माद् वह्निमान् इति । तथा च पर्वतो वह्निमान् धूमात्, यो यो धूमवान् स स वह्निमान्, यथा महानसः, तथा चायम्, तस्मात्तथेत्यत्र 'तस्मात्तथा' इति प्रतिज्ञायाः पुनर्वचनमेव निगमनमिति ।

वैशेषिकाचार्यैः निगमनस्य कृते प्रत्याम्नायशब्दस्य प्रयोगः क्रियते । प्रतिज्ञाप्रत्याम्नायवाक्ययोः विषयभेदाभावेन कुतः पृथक्तया द्वयोः कथनम् ? इति प्रश्ने, उच्यते- प्रतिज्ञावाक्येन केवलं साध्यमेवाभिहितन्न तु निश्चितम् । प्रतिज्ञामात्रेण वस्तुसिद्धिर्न, अतः परार्थबोधनाय तस्य सार्थक्यं नूनमेव वर्तत एव । एतेनोभयोः प्रतिज्ञाप्रत्याम्नाययोः विषयभेदोऽपि स्पष्ट एव । तदुक्तं प्रशस्तपादभाष्यकर्त्रा यत्- "प्रतिपाद्यत्वेनोद्दिष्टे चानिश्चिते च परेषां हेत्वादिभिरवयवैराहितशक्तीनां परिसमाप्तेन वाक्येन निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्याम्नायः" (देवाचार्यः, सन् २०१६, २०१) । अबाधितत्वज्ञानमसत्प्रतिपक्षितत्वज्ञानञ्चेति निगमनस्य प्रयोजनं ज्ञेयम् । एवं प्रकारेणैतैः पञ्चभिर्वाक्यैः पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाबाधितत्व-असत्प्रतिपक्षत्वरूपपञ्चरूपाणि सद्धेतौ विद्यमानानि प्रदर्शितानि भवन्तीति ज्ञायते ।

अनुमानं हि द्विविधमित्युक्तमुपर्येव । तत्र स्वयमेव पर्वते धूमं दृष्ट्वा जायमाना वह्न्यनुमितिः, तादृशानुमितेः हेतुः स्वार्थानुमानमिति । ततः यः कश्चन स्वानुभवरूपेण परं प्रति बोधनाय यत् पञ्चावयववाक्यं

**Haimaprabha** (A Trilingual, Non-Predatory, Peer-reviewed, NepJOL indexed Journal)
Vol.- 1 Number 22, 2023 Pp. 57-65 ISSN : 2392-4764 (P)

प्रयुज्यते, तत् परार्थानुमानमिति । तानि पञ्च वाक्यानि श्रृण्वन् परोऽपि जनः पदार्थनिर्णयं करोति । तान्येव अवयववाक्यानि परमो न्याय इति न्यायभाष्यकारस्योद्घोषः । एतानि पञ्चवाक्यानि विशिष्य वादिप्रतिवादिनोः परस्पराभिमतार्थप्रतिपादनाय वादरूपे जल्परूपे वा वाक्यार्थे प्राधान्येन प्रयुज्यन्त इति । प्रतिज्ञादयः प्रत्यक्षप्रमाणेनानुगृहीतास्सन्तः स्वार्थं प्रबोधयन्ति, वस्तुतोऽनुमानेनैवानुगृहीताः खल्वेते प्रतिज्ञादयः । प्रतिज्ञाया अनुग्राहकं शब्दप्रमाणम्, हेतोरनुग्राहकमनुमानम्, उपनयस्यानुग्राहकमुपमानम्, निगमनस्यानुग्राहकन्तु प्रतिज्ञाहेतूदाहरणोपनयानां एकत्रीकारकत्वात् प्रत्यक्षप्रमाणमेव भवतीति । प्रतिज्ञामन्तरा हेतोः प्रयोजनन्नास्ति, अतः प्रथमं प्रतिज्ञाऽवश्यकी, प्रतिज्ञानन्तरमेव हेतोर्जिज्ञासा समुदेति । किमर्थमिति चेत् हेतुज्ञानानन्तरं साध्यसाधनयोर्व्याप्तिग्राहकप्रमाणमपेक्षितं भवति, स एव दृष्टान्तः, दृष्टान्तानन्तरमपि तादृशव्याप्तियुक्तो हेतुरत्रास्ति न वेति शङ्कानिराकरणायोपनय आवश्यको भवति ।

## निष्कर्ष

अनुमानप्रमाणस्योपयोगस्तु द्विधा भवति । एकन्तावत् स्वस्य कृतेऽनुमानम्, तच्च स्वार्थानुमानमित्युच्यते । अन्यं प्रत्यनुमितिं बोधनाय प्रतिज्ञादीनि पञ्चावयववाक्यानि प्रयुज्यन्ते, तच्च परार्थानुमानमित्युच्यते । अर्थात् स्वार्थानुमानेन कस्यचन पदार्थस्यान्यं प्रति तद्बोधयितुं वाक्यप्रयोगः कर्तव्यो भवति । तदेव वाक्यं परार्थानुमानमित्युच्यते । परार्थानुमानेऽवयववाक्यानामावश्यकं भवति चेत् स्वार्थानुमाने नावश्यकम् । अत एव न्यायाप्रयोज्यानुमानं स्वार्थानुमानं न्यायप्रयोज्यानुमानं परार्थानुमानमिति प्रतिपादितं शास्त्रे । प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनादिभेदेनावयववाक्यानि पञ्च सन्तीति । पञ्चावयववाक्यानां समूहो न्यायः, स च परमो न्याय इति न्यायराद्धान्तो वर्तते । प्रतिज्ञा नाम साध्यनिर्देशरूपा । साध्यस्यास्तित्वसाधनाय साधनत्वेन रूपेण यदवयववाक्यं पक्षे प्रयुज्यते, स हेतुरिति । व्याप्तिप्रतिपादकं यद् दृष्टान्तवचनं तदुदाहरणमिति । व्याप्तिविशिष्टस्य लिङ्गस्य प्रतिपादकवचनमुपनयः । पक्षे साध्यस्य यदबाधितत्वप्रतिपादकं वचनं तन्निगमनं भवतीत्यादयो विषया अत्र निष्कर्षरूपेण प्रस्तुता वर्तन्ते ।

## कृतज्ञताज्ञापनम्

न्यायवैशेषिकदर्शनसम्बद्धस्यावयवस्य स्वरूपविश्लेषणक्रमे, सैद्धान्तिकविषयनिरूपणे, प्रविध्यादिविषये च परामर्शं प्रदातृभ्यो विद्वद्भ्यो धन्यवादं निवेदयन् सूक्ष्मेक्षिकया चालेखमिदमाद्यन्तं सम्परीक्ष्य परामर्शदातृभ्यो विज्ञेभ्यः कार्तज्ञ्यभावं प्रकटयामि ।

**सन्दर्भग्रन्थसूची**

गौतम (१९७८) . *न्यायसूत्र*. 'न्यायभाष्य' वात्स्यायन (भाष्यकार), राजाराय (अनु.), हरभगवान शर्मा।

चन्द्रजसिंह: (सन् १९८५). *तर्कसंग्रहः*, अन्नम् भट्टः (मू. ले.) 'पदकृत्यव्याख्यासहितः'. (व्याख्याता. केदारनाथत्रिपाठी). मोतीलालबनारसीदासः।

देवाचार्यः, प्रशस्तः (सन् २०१६). *प्रशस्तपादभाष्यम्*. व्याख्याता. ढुण्ढिराजशास्त्री, (पुनर्मुद्रणम्). चौखम्भासंस्कृतसंस्थानम्।

भट्टः, अन्नम् (सन् १९८५). *तर्कसंग्रहः*. न्यायबोधिनिपदकृत्यव्याख्यासहितः, (व्याख्याता.
केदारनाथत्रिपाठी). मोतीलालबनारसीदासः।

मिश्रः, केशवः (सन् २००३). *तर्कभाषा*. आशुबोधिनिहिन्दीव्याख्योपेता, व्याख्याता. सुरेन्द्रदेवशास्त्री (पुनर्मुद्रणम्). चौखम्बाविद्याभवनम्।

मिश्रः, शंकरः (सन् १९६९). *वैशेषिकसूत्रोपस्कारः*. (व्याख्याता. ढुण्ढिराजशास्त्री). चौखम्भासंस्कृत–संस्थानम्।

वात्स्यायन. (सन् १९९८). न्यायभाष्यम्. 'प्रसन्नपदव्याख्यासहितम्' (व्या.सुदर्शनाचार्यः). बौद्धभारती।

शास्त्री, द्वारिकादासः (सम्पादकः). (सन् १९९८). *षड्दर्शनसूत्रसङ्ग्रहः*. बौद्धभारती।